मार्कण्डेय उवाच ।
बहुधैवं विचिन्त्यासौ भौतस्तस्य तदा गुरोः ।
ययौ मतिमतां श्रेष्ठः शरणं जातवेदसम् ॥
स चकार ततः स्तोत्रं सप्रार्च्चियतमानसः ।
भूत्वैकचित्तो मेदिन्यां न्यस्तजानुः कृताञ्जलिः ॥
स एवं संस्तुतस्तेन भगवान् हव्यवाहनः ।
ज्वालामालाट्टततनुस्तस्यासीदग्रतो मुने ! ॥
परितुष्टोऽस्मि ते विप्र ! भक्त्या यत्ते स्तुतिः कृता ।
वरं ददामि भवतः प्रार्थ्यतां यत्तवेप्सितम् ॥
भगवन् ! कृतकृत्योऽस्मि यत्त्वां पश्यामि रूपिणम् ।
तथापि भक्तिनम्रस्य भगवन् ! श्रूयतां मम ॥
ममापराधात् संत्यक्तं यत्तेऽधिष्ण्यं विभावसो ! ।
तत्त्वयाधिष्ठितं सोऽद्य पूर्व्ववत् पश्यतां द्विजः ॥
तथान्यदपि मे देव ! प्रसादं कुरुषे यदि ।
पुत्त्रो विशिष्टो भवतु निरपत्यस्य मे गुरोः ॥
यथा च मैत्रीं तनये स करिष्यति मे गुरुः ।
तथा समस्तसत्त्वेषु भवत्वस्य मनो म्रदु ॥
अग्निरुवाच ।
गुरोरर्थं त्वया ब्रह्मन् ! याचितं यद्वरद्वयम् ।
नात्मार्थे तेन मे प्रीतिस्त्वय्यतीव महात्मने ! ॥
भविष्यत्येतदखिलं गुरोर्यत् प्रार्थितं त्वया ।
मैत्री समस्तभूतेषु पुत्त्रस्तस्य भविष्यति ॥
मन्वन्तराधिपः पुत्त्रो भौत्यो नाम भविष्यति ।
महाबलो महावीर्य्यो महाप्राज्ञो गुरोस्तव ॥
इत्युक्त्वा भगवानग्निः पश्यतस्तस्य वै मुने ! ।
बभूवादर्शनः सद्यः प्रदीपो निर्व्वृतो यथा ॥
एतस्मिन्नन्तरे सोऽपि गुरुस्तस्य महात्मनः ।
भ्रातुर्यवीयसो यज्ञादाजगाम स्वमाश्रमम् ॥
तस्यागतस्य शिष्योऽसौ चक्रे पादाभिवन्दनम् ।
गृहीतासनपूजश्च तमाह स तदा गुरुः ॥
वत्सातिहार्द्दं त्वयि मे तथान्येष्वपि जन्तुषु ।
न वेद्मि किमिदं त्वं चेद्वेत्स्येतत् कथयाशु मे ॥
ततः स शान्तिस्तत् सर्व्वमाचार्य्याय महात्मने ।
अग्निनाशादिकं विप्र ! समाचष्ट यथातथम् ॥
तच्छ्रुत्वा स परिष्वज्य स्नेहार्द्रनयनो गुरुः ।
शिष्याय प्रददौ वेदान् साङ्गोपाङ्गान् महात्मने ॥
भौत्यो नाम मनुस्तस्य पुत्त्रो भूतेरजायत ।
तस्य मन्वन्तरे देवानृषीन् भूपांश्च मे शृणु ॥
भविष्यस्य भविष्यांस्तु गदतो मम विस्तरात् ।
देवेन्द्रो यश्च भविता तस्य विख्यातकर्म्मणः ॥
चाक्षुषाश्च कनिष्ठाश्च पवित्रा भ्राजिरास्तथा ।
रजोविकाश्च इत्येते पञ्च देवगणाः स्मृताः ॥
शुचिरिन्द्रस्तथा तेषां त्रिदशानां भविष्यति ।
महाबलो महावीर्य्यः सर्व्वैरिन्द्रगुणैर्युतः ॥
अग्नीध्रश्चाग्निबाहुश्च शुचिर्युक्तोऽथ माधवः ।
शुक्रो जितश्च सप्तैते तदा सप्तर्षयः स्मृताः ॥
गुरुर्गभीरो ब्रध्नश्च भरस्तानुग्र एव च ।
श्रीमानी च प्रवीरश्च विष्णुः संक्रन्दनस्तथा ॥
तेजस्वी सुबलश्चैव भौत्यस्यैते मनोः सुताः ।
चतुर्द्दशं मयैतत्ते मन्वन्तरमुदाहृतम् ॥”
इति मार्कण्डेयपुराणे मन्वन्तरानुवर्णननामाध्यायः ॥

भौमः, पुं, (भूमेरपत्यं । भूमि + शिवादित्वादण् ।) मङ्गलग्रहः । (यथा, बृहत्संहितायाम् ।५।६० ।
“पश्यन् ग्रस्तं सौम्यो
घृतमधुतैलक्षयाय राज्ञां च ।
भौमः समरविमर्द्दं
शिखिकोपं तस्करभयञ्च ॥”)
नरकराजः । (यथा, हरिवंशे । १२० । १४ ।
“तासां पुरवरं भौमोऽकारयन्मणि-
पर्व्वतम् ॥”)
तस्येदमित्यण् । भूमिभवे, त्रि । इति मेदिनी । मे, २२ ॥ (यथा, महाभारते । १ । १९६ । २० ।
“भौमेन प्राविशद्भूमिं पार्व्वतेनाभवद्गिरिः ।
अन्तर्धानेन चाकाशे पुनरन्तर्हितोऽभवत् ॥”)
अम्बरः । इति धरणिः ॥ रक्तपुनर्नवा । इति राजनिर्घण्टः ॥

भौमजलं, क्ली, (भूमि + अण् ।) भूमिसम्बन्धिसलिलम् । तत् त्रिविधं यथा,—
“भौममम्भो निगदितं प्रथमं त्रिविधं बुधैः ।
जाङ्गलं परमानूपं ततः साधारणं क्रमात् ॥”
तेषां लक्षणानि गुणाश्च ।
“अल्पोदकोऽल्पवृक्षश्च पित्तरक्तामयान्वितः ।
देशोऽनूप इति ख्यात आनूपं तद्भवं जलम् ॥
मिश्रचिह्नस्तु यो देशः स हि साधारणः स्मृतः ।
तस्मिन् देशे यदुदकं तत्तु साधारणं स्मृतम् ॥
जाङ्गलं सलिलं रूक्षं लवणं लघु तत्तु ।
वह्निकृत् कफहृत् पथ्यं विकारान् कुरुते बहून् ॥
आनूपं वार्य्यभिष्यन्दि स्वादु स्निग्धं घनं गुरु ।
वह्निकृत् कफकृन्नित्यं विकारान् कुरुते बहून् ॥
साधारणन्तु मधुरं दीपनं शीतलं लघु ।
तर्पणं रोचनं तृष्णादाहदोषत्रयप्रणुत् ॥”
अथ भौमानामेव नादेयादीनां लक्षणानि गुणाश्च । तत्र नादेयस्य लक्षणं गुणाश्च ।
“नद्या नदस्य वा नीरं नादेयमिति कीर्त्तितम् ।
नादेयमुदकं रूक्षं वातलं लघु दीपनम् ।
अनभिष्यन्दि विशदं कटुकं कफपित्तनुत् ॥
नद्यः शीघ्रवहा लघ्व्यः सर्व्वा याश्चामलोदकाः ।
गुर्व्व्यः शैवलसंछन्ना मन्दगाः कलुषाश्च याः ॥
नदीसरस्तडागेषु कूपप्रस्रवणादिषु ।
उदके देशभेदेन गुणान् दोषांश्च लक्षयेत् ॥”
इति भावप्रकाशः ॥

भौमनः, पुं, (व्यादिसर्गे भवतीति भू + कर्त्तरि मन् । भूमा ब्रह्मा । तस्यापत्यम् । अण् । मनन्तत्वात् न टेर्लोपः ।) विश्वकर्म्मा । इति पुराणम् ॥ (यथा, महाभारते । १।२२६ ।१२ ।
“ससर्ज्ज यं सुतपसा भौमनो भुवनप्रभुः ।
प्रजापतिरनिर्द्देश्यं यस्य रूपं रवेरिव ॥”

भौमरत्नं, क्ली, (भूमौ जातं । भूमि + अण् । तादृशं रत्नम् ।) प्रवालम् । इति राजनिर्घण्टः ॥

भौमिकः, त्रि, भूम्यधिकारी । भूमिमधिकरोति यः । इत्यर्थे ष्णिकप्रत्ययेन निष्पन्नः ॥ (भूमिस्थितः । यथा, मनौ । ५ । १४२ ।
“स्पृशन्ति विन्दवः पादौ य आचामयतः परान् ।
भौमिकैस्ते समा ज्ञेया न तैरप्रयतो भवेत् ॥”)

भौमी, स्त्री, (भूम्यां जाता । भूमिः + अण् + स्त्रीत्वात् ङीष् ।) सीता । इति शब्दरत्नावली ॥

भौरिकः, पुं, (भूरि सुवर्णमधिकरोतीति ठक् ।) कनकाध्यक्षः । इत्यमरः । २ । ७ ॥

भ्राश, ऋ ञ टु ङ भासि । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) ऋ अबभ्राशत् । ञ भ्रेशे बभ्राशे । टु भ्राशथुः । ङ भ्राशते । इति दुर्गादासः ॥

भ्राश, य ङ भासि । इति कविकल्पद्रुमः ॥ (दिवा० आत्म०-अक०-सेट् ।) य ङ भ्राश्यते । इति दुर्गादासः ॥

भ्रास, ऋ ञ ङ टु भासि । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट्० ।) ऋ अबभ्रासत् । ञ भ्रेसे बभ्रासे । ङ भ्रासते । टु भ्रासथुः । इति दुर्गादासः ॥

भ्रास, य ङ भासि । इति कविकल्पद्रुमः ॥ (दिवा०-आत्म०-अक-०सेट् ।) य ङ भ्रास्यते । इति दुर्गादासः ॥

भ्यस, ङ भये । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) अन्तःस्थाद्ययुक्तः । ङ भ्यसते । इति दुर्गादासः ॥

भ्रंशः, पुं, (भ्रन्श + भावे घञ् ।) अधःपतनम् । यथा । भ्रेषो भ्रंशो यथोचितात् । इत्यमरः । २ । १८६ । २३ ॥ यथोचितात् यथाप्राप्तात् भ्रंशोऽधःपतनम् । इति भ्रेषशब्दटीकायां भरतः ॥ (यथा, कामन्दकीये नीतिसारे ।२।३८।
“उद्वेजनादधर्म्मस्तु तस्माद् भ्रंशो महीपतेः ॥”
नाशः । यथा, बृहत्संहितायाम् । ४६ । २५ ।
“शाखाभङ्गेऽकस्मात्
तरूणां निर्द्दिशेद्रणोद्योगम् ।
हसने देशभ्रंशं
रुदिते च व्याधिबाहुल्यम् ॥”)

भ्रकुंशः, पुं, (भ्रुवा कुंसो भाषणं यस्य । पृषोदरादित्वात् सस्य शः ।) स्त्रीवेशधारी नर्त्तकपुरुषः । इत्यमरटीकायाम् ॥ (अस्य विशेषो भ्रकुंसशब्दे द्रष्टव्यः ॥)

भ्रकुंसः, पुं, (भ्रुवा कुंसो भाषणं शोभा वा यस्य सः ।६। ३ । ६१ । इत्यस्य “भ्रुकुंसादीनामकारो भवतीति वक्तव्यम् ।” इति वार्त्तिकोक्त्या उकारस्यात्वम् ।) स्त्रीवेशधारी नर्त्तकपुरुषः । तत्पर्य्यायः । भ्रुकुंसः २ भ्रूकुंसः ३ । इत्यमरः १।७।४४॥ भ्रकुंसः ४ भ्रकुंशः ५ । इति तट्टीका ॥

भ्रकुटिः, स्त्री, (भ्रुवोः कुटिः कौटिल्यम् । “भ्रुकुंसादीनामकारो भवतीति वक्तव्यम् ।” ६।३।६१ । इत्यस्य वार्त्तिकोक्त्या । उकारस्यात्वम् ।) क्रोधादिना भ्रुवः कौटिल्यम् । इत्यमरः ।१।७ । ३७ ॥ अस्या रूपान्तराणि । भ्रुकुटिः । भ्रूकुटिः । भ्रकुटिः । भ्रकुटी । भ्रुकुटी । (यथा, माघे ।१५।८।
“भ्रुकुटीकठोरितललाटमाननम् ”)
भ्रूकुटी । भ्रकुटी । इति भरतः ॥